**बहुविकल्पीयाः प्रश्नाः** $5 \times 1 = 5$

प्र.1. वेदस्य चक्षुः वर्त्तते -

(क) व्याकरणम् (ख) कल्पः

(ग) ज्योतिषम् (घ) छन्दः

प्र.2. प्रथमं वेदाङ्गं विद्यते -

(क) निरुक्तम् (ख) छन्दः

(ग) ज्योतिषम् (घ) शिक्षा

प्र.3. वेदस्य कति अङ्गानि ?

(क) त्रीणि (ख) चत्वारि

(ग) पञ्च (घ) षट्

प्र.4. पाणिनीयशिक्षायां कियत्यः कारिकाः सन्ति ?

(क) षष्टिः (ख) पञ्चाशत्

(ग) पञ्चाशत् (घ) सप्ततिः

प्र.5. पाणिनीयशिक्षायां पराश्रितौ कौ?

(क) रुत्वविसर्गौ (ख) जिह्वामूलीयोपध्मानीयौ

(ग) अनुस्वारविसर्गौ (घ) अनुस्वारानुनासिकौ

**बहुविकल्पीयाः प्रश्नाः** $5 \times 2 = 10$

प्र.6. अत्र कति स्वरवर्णाः सन्ति ? [ अ घ उ ऌ च ञ ए औ ]

(क) चत्वारः (ख) पञ्च

(ग) सप्त (घ) अष्ट

प्र.7. कति यमाः ?

(क) चत्वारः (ख) पञ्च

(ग) त्रयः (घ) षट्

प्र.8. पीताम्बरः इह कः समासः ?

(क) तत्पुरुषः (ख) द्वन्द्वः

(ग) बहुव्रीहिः (घ) कर्मधारयः

प्र.9. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति ......... इति मन्त्रः कस्मात् वेदात् सङ्कलितः ?

(क) ऋग्वेदात् (ख) यजुर्वेदात्

(ग) सामवेदात् (घ) अथर्ववेदात्

प्र.10. मध्यमपुरुषस्य उदाहरणमस्ति -

(क) ते गच्छन्ति । (ख) तौ गच्छतः ।

(ग) यूयं गच्छथ । (घ) वयं गच्छामः ।

**अशुद्धं/ शुद्धं लिखत** 5 × 2 = 10

प्र.11. अकुहविसर्जनीयानां कण्ठः।

प्र.12. लृतुलसानां तालुः।

प्र.13. एदैतोः कण्ठोष्ठौ।

प्र.14. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

प्र.15. अहं वेदं पठति।

**समुचितं शब्दमेलनं कुरुत।** 5 × 2 = 10

| | |
|---|---|
| प्र.16. निरुक्तम् | मुखम् |
| प्र.17. शिक्षा | श्रोत्रम् |
| प्र.18. व्याकरणम् | घ्राणम् |
| प्र.19. स्वाध्यायान्मा | प्रमदितव्यम् |
| प्र.20. धर्मान्न | प्रमदः |

**रिक्तस्थानानां पूर्तिः करणीया ।** 10 × 2 = 20

प्र.21. अव्ययं विभक्तिसमीप.......................... वचनेषु।

प्र.22. मन्त्रो हीनः स्वरतो ............................ न तमर्थमाह।

प्र.23. न तु मां शक्यसे द्रष्टुं .......................... चक्षुषा।

प्र.24. ये ........................ मुत्सृज्य यजन्ते श्रद्धयान्विताः।

प्र.25. ब्रह्मचर्यमहिंसा च ............................. उच्यते।

प्र.26. सर्वस्य लोचनं ........................... नास्त्यन्ध एव सः।

प्र.27. उत्तरपदप्रधानः ........................ समासः।

प्र.28. अन्यपद .......................... बहुब्रीहिः ..................।

प्र.29. उभयपदप्रधानः ................................ समासः।

प्र.30. उपकृष्णम् इत्यत्र.............................. समासः।

**अतिलघूत्तरीयाः प्रश्नाः** 5 × 2 = 10

प्र.31. श्रीमद्भगवद्गीतायां कति श्लोकाः?

----------------------------------------------------------------

----------------------------------------------------------------

प्र.32. लघुसिद्धान्तकौमुद्याः रचयिता कः ?

----------------------------------------------------------------

----------------------------------------------------------------

प्र.33. विद्यया किम् अश्नुते ?

----------------------------------------------------------------

----------------------------------------------------------------

प्र.34. श्रीमद्भगवद्गीतायाः एकादशाध्यायस्य नाम किम् ?

----------------------------------------------------------------

----------------------------------------------------------------

प्र.35. चन्द्रापीडः कम् उपदिशति ?

----------------------------------------------------------------

----------------------------------------------------------------

**लघूत्तरीयाः प्रश्नाः** 5 × 3 = 15

प्र.36. वृत्तयः कति ? तेषां नामानि च लिखत।

----------------------------------------------------------------

----------------------------------------------------------------

प्र.37. वर्णानां स्थानानि कानि ? तानि च लिखत।

प्र.38. कति समासाः ? तेषां नामानि च वर्णयत।

प्र.39. 'पीताम्बरः' इति पदस्यालौकिक- लौकिकविग्रहौ विधीयताम्।

प्र.40. 'दौवारिकस्य निष्ठा' इति पाठः कुतः गृहीतः ?

**दीर्घोत्तरीयाः प्रश्नाः** 10 × 2 = 20

प्र.41. छात्रजीवनम् अथवा अनुशासनम् इति विषयमधिकृत्य स्वविचारान् प्रकटयत।

प्र.42. संस्कृतभाषायाः महत्त्वम् अथवा श्रीमद्भगवद्गीतायाः परिचयो विलिख्यताम्।